सम्पादकीयम्

नीलाचलनिवासाय नित्याय परमात्मने।
बलभद्रसुभद्राभ्यां जगन्नाथाय ते नमः।।

चिरप्रतीक्षितायाः अस्याः "**सदाशिवम्**" इति संज्ञाया ई – पत्रिकायाः प्रथमं संस्करणं प्रस्तुवन् मोमुद्यते सदाशिवमिति पत्रिकापरिवारस्य चेतः। वस्तुतः वर्तमाने नवयुगे ई – पत्रिकायाः बहूपयोगिता दरीदृश्यते। ई-पत्रिका एकस्मिन् एव क्षणे सम्पूर्णे जगति अवलोकयितुं शक्यते। देशे विदेशे च संस्कृतसेवापरायणाः विद्वांसः संस्कृतानुरागिणश्च ई-पत्रिकामाध्यमेन शास्त्रसम्बद्धां ज्ञानराशिं प्राप्तुं शक्नुवन्ति। एवमप्रकारेण पत्रिकासाहाय्येन शास्त्रज्ञानस्य आदानं प्रदानञ्च अल्पीयसा कालेन सम्भाव्यते। अतः अस्माकं परिसरस्य शब्दशास्त्रनिष्णातैः परमविचक्षणैः प्राचार्यवर्यैः संस्कृतसप्ताहोत्सवे काचित् ई- पत्रिकां भवेदिति सङ्कल्पितम् । ततः तैः पत्रिकायाः प्रकाशनार्थं डॉ.नीलाभतिवारीमहोदयस्य आध्यक्ष्ये एका समितिः प्रकल्पिता। तत्र डॉ.मखलेशकुमारः, डॉ.जि.सूर्यप्रसादः, डॉ.मदनकुमारझा, डॉ.नन्दिघोषमहापात्रश्च सदस्यत्वेन दायित्वं निर्व्यूढवन्तः। समितेः अथकपरिश्रमेण **"सदाशिवम्"** इति ई - पत्रिकायाः प्रथमसंस्करणं विदुषां पुरतः विराजते।

मनुष्यजन्म सुदुर्लभं विद्यते। बहूनां जन्मनामन्ते आत्मानं संशोध्य जीवः नृजन्म कदाचित् प्राप्नोति। नृजन्मनि शास्त्रस्य आलोचनेन मननेन च मनुष्यमात्रस्य प्रज्ञा संवर्धिता भवति। प्रज्ञायाः संवर्धनं प्रथमं कर्त्तव्यमिति शास्त्रेषूद्घोषितम्। तद्यथा –

शास्त्रसज्जनसम्पर्कैः प्रज्ञामादौ विवर्धयेत्। (योगवाशिष्ठम् 6.120.1)

किं नाम शास्त्रमिति जिज्ञासायां चतुर्दशविद्यास्थानमेव शास्त्रमिति विद्वांसः आमनन्ति। कथितञ्च विष्णुपुराणे –

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्या ह्येता चतुर्दश॥ (विष्णुपुराणम्)

प्रायश्चित्तकारस्तु अन्येषां चतुर्णामुपवेदानां संयोजनेन विद्यास्थानमष्टादश इति प्रतिपादयति –

आयुर्वेदो धनुर्वेदो गान्धर्वं चेति ते त्रयम्।
अर्थशास्त्रं चतुर्थञ्च विद्या अष्टादशैव ताः॥

कर्त्तव्याकर्त्तव्यविनिर्णये परोक्षार्थस्य प्रकाशने सर्वत्र शास्त्रमेव प्रमाणं भवति। एतादृशं शास्त्रलोचनं यस्य नास्ति सः चक्षुष्मान् भूत्वा अपि अन्धो भवति। उक्तञ्च हितोपदेशे –

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥ (हितो.1.10)

अतः शास्त्रमाश्रित्य **"सदाशिवम्"** इति ई-पत्रिकायाः इदमाद्यं संस्करणं द्वादशशोधपत्रैः सह विदुषां दृष्टिपथं समायाति। शास्त्रानुकूल्यानि इमानि शोधपत्राणि प्रायः नवसन्दर्भानपि समुद्घाटयन्ति। ये विद्वत्तल्लजाः स्वकीयं शोधपूर्णं लेखं सम्प्रेष्य अस्मिन् सारस्वतयज्ञे योगदानं प्रदत्तवन्तः तान् प्रति सदाशिवमिति ई-शोधपत्रिकापरिवारः स्वकृतज्ञतां प्रकटयति। तथा च विद्वांसः समीक्षकाः ये सूक्ष्मेक्षिकया शोधपत्राणां परिशीलनं पुनरीक्षणञ्च कृतवन्तः तेभ्यः सर्वेभ्यः अपि धन्यवादान् समर्पयति ई-पत्रिकेयमिति शम्।

सम्पादकः